THE ŚĀRĪRAKĀRTHASAṂKṢEPA
OF
RĀGHAVĀCĀRYA

EDITED BY V. KRISHNAMACHARYA

THE *Śārīrakārthasaṃkṣepa* of Rāghavācārya, which is now being published for the first time, is a brief metrical work in 114 Anuṣṭubh verses, giving clearly the main principles of the Viśiṣṭādvaita school of Vedānta, and may be considered as a companion to the *Vedāntakārikāvali* of Bucci Veṅkaṭācārya published as No. 75 in the Adyar Library Series in 1950.

The work also gives towards the end a gist of the topics dealt with in each of the four chapters of the *Brahmasūtra* of Bādarāyaṇa, and this adds to the importance of the work. Details about its author Rāghavācārya are not known, but he is a later author and may be assigned to the eighteenth century A.D.

This edition is based on a unique palm-leaf manuscript (No. 75599) in the Adyar Library; size 39×3.5 cms., 7 leaves, 6 lines per page. It is in Grantha script and is fairly old. The title of the work *Śārīrakārthasaṃkṣepa* is found in the margin of the first leaf.

शारीरकार्थसंक्षेपः

राघवाचार्यकृतः

नत्वा शार्ङ्गधरं देवं राघवार्यविपश्चिता ।
श्रीलक्ष्मणार्यसिद्धान्तः श्लोकैः संगृह्यतेऽधुना ॥ १ ॥
शास्त्रस्य विषयो मुख्यः श्रीशोऽस्य चिदचिद्वपुः ।
नित्यनैमित्तिकैर्धर्मैः काम्यैश्चानुगृहीतया ॥ २ ॥
तदुपासनया भूयस्तन्न्यासेनैव वा सकृत् ।
तत्साम्यमेयुषः पुंसस्तद्देशावाप्तिपूर्वकम् ॥ ३ ॥
पूर्णब्रह्मानुभूत्यात्मा मुक्तिरत्र प्रयोजनम् ।
तत्राचिच्चेतनाहीनद्रव्यं तत् त्रिविधं मतम् ॥ ४ ॥
प्रकृतिः समयः शुद्धसत्त्वमित्थं प्रभेदतः ।
विकारभिन्ना सत्त्वादिगुणा प्रकृतिरिष्यते ॥ ५ ॥
तद्विकारो महांस्त्रेधा सात्त्विकादिप्रभेदतः ।
अहंकारश्च महतो विकारः सोऽपि पूर्ववत् ॥ ६ ॥
स्युरिन्द्रियाण्यहंकारात् सात्त्विकात् तानि च द्विधा ।
ज्ञानकर्मेन्द्रियमिति तत्राद्यं पञ्चधा स्मृतम् ॥ ७ ॥
घ्राणं च रसनं चक्षुस्त्वक् श्रोत्रमिति भेदतः ।
क्रमाद् गन्धादिशब्दान्तग्राहि घ्राणादिपञ्चकम् ॥ ८ ॥
द्वितीयं च मनस्तत् स्याज्ज्ञानसामान्यकारणम् ।
सुखादेश्चात्मनोऽध्यक्षे त्वसाधारणकारणम् ॥ ९ ॥

वाक्पाणिपादपायूनामुपस्थस्य च भेदतः ।
कर्मेन्द्रियाणि पञ्च स्युर्वचनादानयोर्गतेः ॥ १० ॥
विसर्जनानन्दनयोर्हेतुस्तानि यथाक्रमम् ।
चक्षुरादिकमेकैकस्यैकैकं प्रलयावधि ॥ ११ ॥
मृतौ वा परकायेषु प्रवेशे वा सहाञ्चति ।
उत्सृष्टमपि मुक्तैस्तत् कारणे स्वे विलीयते ॥ १२ ॥
प्रलयान्तमवस्थाय कार्याणां कारणे लयात् ।
अणून्येतानि बुद्ध्याद्या मनोधर्माः प्रकीर्तिताः ॥ १३ ॥
प्राणश्च तेषामुत्कृष्टः प्राणापानादिवृत्तिकः ।
अणुर्वायुविकारश्च भूतसृष्टिरथोच्यते ॥ १४ ॥
तामसाच्छब्दतन्मात्रमहंकारात् ततोऽम्बरम् ।
राजसः सहकारी स्यादहंकृत्योर्द्वयोरपि ॥ १५ ॥
आकाशात् स्पर्शतन्मात्रं स्पर्शतन्मात्रतोऽनिलः ।
अनिलाद्रूपतन्मात्रं रूपतन्मात्रतोऽनलः ॥ १६ ॥
अनलाद्रसतन्मात्रं रसतन्मात्रतो जलम् ।
जलाच्च गन्धतन्मात्रं ततः पृथ्वीति च क्रमः ॥ १७ ॥
सर्वत्रात्र ह्युपादानं प्रकृत्यादिवपुः परः ।
स एव कार्यतां याति महदादिशरीरकः ॥ १८ ॥
निमित्तं च भवेदेष संकल्पात् कालविग्रहः ।
एवं सृष्टपदार्थानामास्थितानां पृथक् पृथक् ॥ १९ ॥
कार्याक्षमत्वमालोच्य कृत्वा तेषां च मेलनम् ।
प्रधानभूतस्यार्धेन त्वितरार्धेन च स्वयम् ॥ २० ॥
स पञ्चीकरणं कृत्वा जीवद्वारा प्रविश्य च ।

व्याकृत्य नामरूपे च बभौ तन्नामरूपभाक् ॥ २१ ॥
श्रुतिसिद्धमिदं सर्वं सर्वैश्च ग्राह्यमेव तत् ।
कार्योपादानयोरैक्यमास्थेयं मृदयं घटः ॥ २२ ॥
हिरण्यं कुण्डलमिति निर्बाधाभेदबुद्धितः ।
उपपन्नास्तालपत्रताटङ्कव्यवहारवत् ॥ २३ ॥
अवस्थाभेदमाश्रित्य बुद्धिशब्दान्तरादयः ।
उत्तरावस्थितिः कार्यं पूर्वावस्थैव कारणम् ॥ २४ ॥
एकस्यैव सतोऽर्थस्य पूर्वावस्थाप्रहाणतः ।
उत्तरावस्थितिप्राप्तिरुत्पत्तिर्नासदुद्भवः ॥ २५ ॥
तथैव तस्य चार्थस्य पूर्वावस्थापरिग्रहः ।
उत्तरावस्थितित्यागाद्विनाशो न निरन्वयः ॥ २६ ॥
अतीतादिव्यवहृतौ हेतुः काल उदाहृतः ।
स नित्यो विभुरेकश्च सर्वप्रत्यक्षगोचरः ॥ २७ ॥
विशेषणतयार्थानां ग्रहे सर्वत्र भानतः ।
कलाकाष्ठादयस्तस्य विकाराः परिकीर्तिताः ॥ २८ ॥
सत्त्ववत् तमसा हीनं शुद्धसत्त्वं प्रचक्षते ।
अप्राकृतः स चोद्देश ऊर्ध्वं प्रकृतिमण्डलात् ॥ २९ ॥
शुद्धसत्त्वमयानि स्युस्तत्र तत्त्वानि सर्वशः ।
मुक्तानामपि नित्यानां लक्ष्म्या भगवतस्तथा ॥ ३० ॥
लीलापरिगृहीतानि विग्रहादीनि तत्र च ।
अथ जीवेशभेदेन तत्र चिद् द्विविधो मतः ॥ ३१ ॥
ईशान्यश्चेतनो जीवः स्वतः शेषोऽथवा स चित् ।
स चाणुः सर्वदेहस्थसुखाद्यनुभवस्तथा ॥ ३२ ॥

कायव्यूहानुभूतिश्च योगिनां वपुरन्तरे ।
सुखादेरुपलब्धिश्च तदीयज्ञानवैभवात् ॥ ३३ ॥
अन्यथाणुत्वशास्त्रस्य विरोधः पुण्यपापयोः ।
प्रीत्यप्रीतिस्वरूपत्वोपगमाच्च श्रियः पतेः ॥ ३४ ॥
न तयोः फलसिद्ध्यर्थमेष्टव्यं तस्य वैभवम् ।
न तद्द्वारस्य नियता कर्माधिकरणस्थता ॥ ३५ ॥
जातेष्टौ व्यभिचारेण ज्ञानं ज्ञानगुणश्च सः ।
एकत्र श्रवणात् तस्य ज्ञानत्वज्ञानवत्त्वयोः ॥ ३६ ॥
ज्ञानं सुषुप्तिमूर्छादौ धर्मिभूतं हि भासते ।
प्रत्यक्त्वमनुकूलत्वमेकत्वादि च तद्गुणाः ॥ ३७ ॥
धर्मभूतं स्वतो नित्यं ज्ञानं सर्वप्रकाशकम् ।
कर्मिणां करणाधीनप्रसरं चाल्पगोचरम् ॥ ३८ ॥
तदेवावारकाभावान्मुक्तानामीश्वरस्य च ।
सर्वदा सर्वविषयमिच्छाद्वेषप्रयत्नकाः ॥ ३९ ॥
सुखं दुःखं च तज्ज्ञानावस्थाभेदाः प्रकीर्तिताः ।
द्रव्यत्वाद्धर्मभूतस्य नावस्थास्य विरुध्यते ॥ ४० ॥
द्रव्यत्वेऽप्यविरोधोऽस्य गुणत्वे स्वाश्रयं प्रति ।
प्रभावादुभयात्मत्वसंभवात् सा प्रभावतः ॥ ४१ ॥
दीपादेर्गुणभूता च तेजोद्रव्यमपि स्वयम् ।
गुणत्वे केवले तस्या धर्मिणोऽन्यत्र रूपवत् ॥ ४२ ॥
उपलब्धिर्न च भवेत् स्वतन्त्रद्रव्यतापि न ।
तथा सत्युपलभ्येत दीपादिविरहेऽप्यसौ ॥ ४३ ॥
प्रत्यक्षमनुमानं च तादृशज्ञानकारणम् ।

आगमश्चेत्यनुभवस्तज्जन्यं ज्ञानमिष्यते ॥ ४४ ॥
संस्कारद्वारकं ज्ञानं स्मृतिर्नामानुभूतिजम् ।
यथार्थं सर्वमेवैतद्विज्ञानमिति पूर्वकाः ॥ ४५ ॥
पञ्चीकृतिप्रक्रियया शुक्तौ रजतसंभवात् ।
तज्ज्ञानस्य यथार्थत्वं रजतावयवाल्पता ॥ ४६ ॥
तत्कार्याक्षमताहेतुः पूर्वमीमांसकैरपि ।
व्रीहीणां सन्ति नीवारेष्वंशास्तेन त एव हि ॥ ४७ ॥
तेषां प्रतिनिधित्वेन ग्राह्या नान्य इतीरितम् ।
स्वप्नदृङ्मात्रविज्ञेयतात्कालिकपदार्थसृट् ॥ ४८ ॥
ईश इत्यभिधानेन स्वाप्नज्ञानमपि प्रमा ।
अन्यथाख्यात्युपगमेऽप्यदोष इति च क्रमः ॥ ४९ ॥
एवं ज्ञानस्वरूपस्तद्गुणश्चात्मेति साधितम् ।
तथैवानन्दरूपस्तद्गुणश्चात्मेति चोह्यताम् ॥ ५० ॥
बन्धे ज्ञानवदानन्दतिरोधिः कर्मणेति च ।
स च देहेन्द्रियमनःप्राणादिभ्योऽतिरिच्यते ॥ ५१ ॥
व्यतिरेकानुभवतस्तदानन्त्यमपि स्फुटम् ।
सुखदुःखादिवैचित्र्यादानन्त्यश्रवणादपि ॥ ५२ ॥
स्वं प्रत्यसौ वपुरिव स्वतः शेषः सदा विभोः ।
न कदाचित् स्वतन्त्रोऽयं कर्तृत्वाद्यस्य तत्कृतम् ॥ ५३ ॥
बद्धो मुक्तश्च नित्यश्च स जीवः कीर्तितस्त्रिधा ।
बद्धश्च संसरन् मुक्तो बन्धेनादौ श्रियः पतेः ॥ ५४ ॥
व्याजापेक्षकृपाधीनसदाचार्यकृपावशात् ।
विवेकवैराग्यनिधिस्तत्प्रदर्शितवर्त्मना ॥ ५५ ॥

कुर्वाणः परभक्त्यन्तां दहराद्यामुपासनाम् ।
प्रयुञ्जानोऽथवा न्यासविद्यां तेनैव दर्शिताम् ॥ ५६ ॥
मूर्धन्यनाड्या निष्क्रामन्नन्ते प्रारब्धकर्मणः ।
आतिवाहिकनीतः सन् मार्गेणार्चिर्दिनादिना ॥ ५७ ॥
संतीर्य विरजां व्यस्तप्रकृतिः प्राप्य तत् पदम् ।
शुद्धसत्त्वमयं देशमाविर्भूतस्वरूपकः ॥ ५८ ॥
प्रत्युद्गतः पञ्चशताप्सरोभिः समलंकृतः ।
वासुदेवं परं प्राप्य तत्स्वरूपगुणानुभूः ॥ ५९ ॥
परमं साम्यमापन्नः शेषवृत्तीर्यथोचितम् ।
कुर्वन्नावारकाभावादसंकुचितधर्मकः ॥ ६० ॥
कदाचिदप्यसंसृष्टबन्धो नित्यस्तु कथ्यते ।
आत्मत्वेऽपि यथेशस्य तादृक्त्वं मानवैभवात् ॥ ६१ ॥
नित्यानामपि तादृक्त्वं सदा पश्यच्छ्रुतेर्बलात् ।
विवादो नात्मबाहुल्ये ह्यैक्ये दोषादनेकशः ॥ ६२ ॥
अन्यानुभूते चान्यस्य स्मृतिस्तर्हि प्रसज्यते ।
आपद्येतानुभूतिश्च सुखादेर्यौगपद्यतः ॥ ६३ ॥
अविद्योपाधिवशतो विरोधो नेत्यसंगतम् ।
तदैक्ये पूर्ववद्दोषाद्भेदेऽनुभवनिह्नवात् ॥ ६४ ॥
अनुभूतस्त्वया योऽसौ स एवाद्यानुभूयते ।
मयापि चेत्यनुभवो विद्यते सार्वलौकिकः ॥ ६५ ॥
अविद्याभेदभिन्नत्वात् कल्पितस्य च वस्तुनः ।
अतश्च त्रिविधा जीवाः स्वतोऽनन्ताः पराश्रयाः ॥ ६६ ॥
तच्छेषतैकरूपास्तदधीनाश्चेति च स्थितम् ।

परमात्मा च सर्वेशः सर्वशेषी जगद्वपुः ॥ ६७ ॥
सर्वात्मा सर्वहेतुश्च सर्ववाच्यो गुणाकरः ।
हेयद्विट् सर्वकर्माऽच्यः सर्वकर्मफलप्रदः ॥ ६८ ॥
स्वतन्त्रः श्रीपतिस्तत्र चेश्वरत्वं नियन्तृता ।
स्वगतातिशयाधानस्पृहयान्यपरिग्रहः ॥ ६९ ॥
शेषित्वमपृथक्सिद्धद्रव्यत्वं च शरीरता ।
यस्य जीवस्य यद् द्रव्यं नियन्तुं शक्यते स्वयम् ॥ ७० ॥
यावत्सत्तं स्वशक्यार्थे शरीरं तस्य तद्भवेत् ।
निर्दुष्टं लक्षणमिदं सर्वसाधारणत्वतः ॥ ७१ ॥
अस्त्येवेदं चिदचितोरीश्वरं प्रति लक्षणम् ।
अन्तर्यामिब्राह्मणादावुक्तं सर्वं हि तद्वपुः ॥ ७२ ॥
एवं सर्वान्तरात्मत्वमपि तत्रैव सुस्फुटम् ।
अनेनैव तु निर्वाहो भेदाभेदश्रुतेः कृतः ॥ ७३ ॥
स्वरूपभेदमादाय भेदश्रुत्युपपादनम् ।
सर्वस्यामप्यवस्थायां ब्रह्मकायत्वबोधनात् ॥ ७४ ॥
सामानाधिकरण्यं यज्जगतस्तन्निबन्धनम् ।
तद्गोचरतया चैक्यश्रुतिप्रामाण्यमीरितम् ॥ ७५ ॥
वेदविद् द्विज इत्यादिव्यवहारोऽपि लौकिकः ।
तत्र च ज्ञानविप्रत्वविशिष्टैक्यं प्रयोजकम् ॥ ७६ ॥
सामानाधिकरण्येषु तद्वत् सर्वश्रुतावपि ।
प्रकारद्वयवद्वस्तुस्वरूपैक्यावलम्बनम् ॥ ७७ ॥
सामानाधिकरण्यं स्यान्निर्वाहस्तेन तच्छ्रुतेः ।
जीवैक्यबोधनेऽभेदे सामानाधिकरण्यकम् ॥ ७८ ॥

जडैक्यबोधे बाधार्थं तथा कारणकार्ययोः ।
ऐक्यस्य बोधनेऽध्यस्तधर्मैस्तदिति दुर्मतम् ॥ ७९ ॥
वैरूप्यकल्पनापत्तेरपृथग्धर्मवाचिता ।
सर्वत्रैवैकरूपेण तन्त्रं तत्रेति कल्पनात् ॥ ८० ॥
तत् सिद्धमन्तर्यामित्वं सर्वश्रुत्युपपादकम् ।
न च सर्वस्वरूपत्वे ब्रह्मणः कुप्यति श्रुतिः ॥ ८१ ॥
निर्विकारत्वविषया तद्देहेऽचिच्चिदात्मके ।
वर्तनात् तद्विकारस्य स्वरूपाननुषङ्गतः ॥ ८२ ॥
एवं सर्वस्य जगतो भगवानेव कारणम् ।
ननु विष्णुवदन्येषामपि कारणता श्रुता ॥ ८३ ॥
नातोऽवधारणं न्याय्यमिति बालिशभाषितम् ।
ब्रह्मरुद्रेन्द्रविष्णूनां कारणत्वं च कार्यता ॥ ८४ ॥
श्रुता यद्यपि चैकस्य द्व्यात्मकत्वविरोधतः ।
धर्मिभेदात् परिहृतेः सर्वस्यावश्यकत्वतः ॥ ८५ ॥
अनेकहेतुकत्वस्य जगतां च प्रसङ्गतः ।
निर्धारणेऽस्य चैकत्र ह्यवश्यंभाविनि स्थिते ॥ ८६ ॥
विष्णोरेवान्यबाधेन तदेतदिति निर्णयः ।
न हि तस्य च कार्यत्वं कारणत्वे विरुध्यते ॥ ८७ ॥
अवतारपरत्वावसायात् तत्कार्यताश्रुतेः ।
नारायणानुवाकस्थश्रीशतालिङ्गयुक्तया ॥ ८८ ॥
अजायमानताश्रुत्या मानान्तरसमेतया ।
विधिशंकरमध्यस्थविष्णुमूर्तेः स्वरूपतः ॥ ८९ ॥

रक्षार्थं सर्वभूतानामित्यादि ज्ञेयमत्र च ।
उत्तीर्णत्वतुरीयत्ववादास्तन्मूर्त्यपेक्षया ॥ ९० ॥
शिवशंभ्वादिवादाश्च नेयाः प्राणादिनीतितः ।
तत् सिद्धं सर्वजगतां कारणं भगवानिति ॥ ९१ ॥
प्रविश्यान्तः पदार्थानां व्याकृत्या नामरूपयोः ।
तन्नामरूपभाक्त्वेन तस्य सर्वाभिधेयता ॥ ९२ ॥
वचसां वाच्यमित्यादि प्रमाणं चात्र दृश्यताम् ।
किंच निर्गुणवादश्च गुणान् हेयान् निषेधति ॥ ९३ ॥
विधत्ते तस्य कल्याणान् गुणांश्च सगुणश्रुतिः ।
एकेनैव तु वाक्येन जरादिप्रतिषेधतः ॥ ९४ ॥
सत्यकामादिविधिना ह्ययमर्थोऽवगम्यते ।
तत् सिद्धं सुगुणाढ्यत्वं निर्हेयत्वं च वै विभोः ॥ ९५ ॥
अहं हि सर्वयज्ञानामित्यादिवचनैरपि ।
सर्वकर्माभिराध्यत्वं फलदत्वं च सिध्यति ॥ ९६ ॥
अत एव स्वतन्त्रत्वं सर्वावस्थास्वपि स्वतः ।
अशेषजगदीशाया व्यापिन्याः सर्ववस्तुषु ॥ ९७ ॥
उद्भवेष्वनपायिन्याः श्रियः कृष्णादिरूपतः ।
विशेषणत्वाच्छेषत्वात् तत्पतित्वं च लक्षणम् ॥ ९८ ॥
वेदार्थस्येदृशस्यास्य दुर्बोधत्वं विशङ्क्य वै ।
जगज्जिजीवयिषयावतीर्य व्यासरूपतः ॥ ९९ ॥
श्रीमता सर्वजगतामीशेन करुणाब्धिना ।
तदर्थनिर्णयपरं मीमांसाशास्त्रमीरितम् ॥ १०० ॥

अथात इति तस्येदमादिमं सूत्रमुच्यते ।
तदर्थः कर्ममीमांसानन्तरं तत एव हि ॥ १०१ ॥
विचारो ब्रह्मणः कार्यो हेतोरिति समञ्जसः ।
अत एवैकशास्त्र्यं च कर्मब्रह्मविचारयोः ॥ १०२ ॥
विषयस्य च कर्तुश्च भेदो नैक्यस्य बाधकः ।
काशिकादिषु तस्यास्य बाधकत्वं न दृश्यते ॥ १०३ ॥
विद्यास्थानेषु मीमांसेत्युभयोरपि शब्दनात् ।
विरोधश्च परीहार्य एकग्रन्थविरोधवत् ॥ १०४ ॥
तत्र चादौ चतुःसूत्र्यां व्युत्पत्तिविरहादिकैः ।
शास्त्रानारम्भमाशङ्क्य तत्परीहार ईरितः ॥ १०५ ॥
अयोगादिव्यवच्छेदसिद्ध्यर्थं च विचारितम् ।
अस्पष्टतरमस्पष्टं स्पष्टं छायानुकारि च ॥ १०६ ॥
वाक्यं पादचतुष्टय्या जीवप्रकृतिलिङ्गयोः ।
उक्तार्थस्य स्थिरीकृत्यै द्वितीयाध्यायतः कृता ॥ १०७ ॥
स्मृतितर्कनिरासेन परपक्षप्रतिक्षिपा ।
खाद्युत्पत्तिविचारेण हृषीकोत्पत्तिनिर्णयैः ॥ १०८ ॥
समर्थितोऽविरोधोऽभूदुपायश्च तृतीयतः ।
गत्यागतिविचारेण स्वप्नमोहविचारणात् ॥ १०९ ॥
जीवस्योत्पाद्य वैराग्यमुत्पाद्याभिरुचिं परे ।
तस्य द्विलिङ्गकत्वस्य निर्णयेन विचारतः ॥ ११० ॥
विद्यानां विविधत्वस्य गुणाकर्षविचारतः ।
कर्माङ्गकत्वनिर्णीत्या सम्यक् च प्रतिपादितः ॥ १११ ॥

तुरीयेण च विद्यानां निष्पत्तेः पुण्यपापयोः ।
अश्लेषादेर्विचारेणोत्क्रान्तिमार्गविनिर्णयात् ॥ ११२ ॥
विशिष्टदेशसंपत्तेराविर्भूतेः स्वरूपतः ।
सार्वज्ञ्यादिगुणैर्ब्रह्मसाधर्म्यस्य च निर्णयात् ॥ ११३ ॥
फलं निरूपितं सम्यक् पाराशर्येण विष्णुना ।
एवं शारीरकस्यास्य सर्वस्मृत्यादिगोचरः ।
नारायणः परं ब्रह्म प्रतिपाद्यमिति स्थितम् ॥ ११४ ॥